# M.A. 4th Semester Examination, 2021
# Subject: Sanskrit
# Course Code: SNSK 404EB
# Course ID: 40954
# Course Title: Kāvyatattvamīmāṁsā

**Full Marks: 40** **Time: 2 Hrs**

**The figures in the margin indicate full marks**

**UNIT - I**

१. **यथेच्छं प्रश्नचतुष्टयं समाधेयम्।** ५X४=२०

क) रससूत्रव्याख्याने भट्टलोल्लटस्य मतमालोचयतु।

ख) रससूत्रव्याख्याने भट्टशङ्कुकस्य मतमालोचयतु।

ग) रससूत्रव्याख्याने भट्टनायकस्य मतमालोचयतु।

घ) रससूत्रव्याख्याने अभिनवगुप्तस्य मतमालोचयतु।

ङ) रीतिरात्मा काव्यस्य इति मतमालोचयतु।

च) प्लेटोमहोदयीय-काव्यतत्त्वे **metaphysics** इत्यस्य प्रभावः लिख्यताम्।

छ) रोमान्टिसिजम् इति विषयः वर्ण्यताम्।

**UNIT - II**

२. **यथेच्छम् एकः समाधेयः।** १०X१=१०

को नाम अविवक्षितवाच्यध्वनिः? तस्य कति भेदाः? ध्वन्यालोकस्य द्वितीयोद्योतमवलम्ब्य सोदाहरणम् अविवक्षितवाच्यध्वनिः व्याख्येयः।

अथवा

को नाम विवक्षितान्यपरवाच्यध्वनिः? तस्य प्राथम्येन कति भेदाः? स च ध्वनिः उदाहरणसहयोगेन व्याख्येयः।

अथवा

माधुर्यगुणस्य प्रधानो हि विषयः शृङ्गारः – इति ध्वन्यालोकस्य द्वितीयोद्योतमवलम्ब्य व्याख्यायताम्। शृङ्गारे करुणे च रसे माधुर्यस्य उत्तरोत्तरम् उत्कर्षः कथं साधित इति आलोच्यताम्। ५+५=१०

**३. यथेच्छं पञ्चप्रश्नाः समाधेयाः।** २X५=१०

क) को नाम ध्वनेर्विषयो भवति ?

ख) कुत्र रसाद्यलङ्कारः स्यात् ?

ग) अलङ्काराणां कदा अलङ्कार्यत्वसाधनं भवति ?

घ) को नाम प्रसादो गुणः ?

ङ) ध्वन्यात्मके शृङ्गारे के दोषाः वर्जनीयाः ?

च) ध्वनेः अभिव्यक्तौ के अलङ्काराः भवन्ति ?

छ) को नाम शब्दशक्त्युद्भवध्वनिः ?

ज) कीदृशोऽनुप्रासो रसव्यञ्जको न भवति ?